# Vishnustava by Aditi

# अदितिकृतविष्णुस्तवः

## Document Information

Text title : Vishnustava by Aditi

File name : aditikRRitaviShNustavaH.itx

Category : vishhnu, bRihaddharmapurANam

Location : doc_vishhnu

Proofread by : Ruma Dewan

Description/comments : Brihaddharmapuranam | madhyakhaNDaH | adhyAyaH 46| 1136 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# अदितिकृतविष्णुस्तवः

अदितिरुवाच ।
तस्मै नमस्ते कृष्णाय हरये परमात्मने ।
अजाय चादितेयाय काश्यपाय नमोऽस्तुते ॥ १॥

नमस्ते पृश्निगर्भाय कैवल्यपतये नमः ।
देववन्दितपादाब्ज नमस्तुभ्यं नमो नमः ॥ २॥

स्मृतार्त्तिनाशकानन्त देव पद्मविलोचन ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ३॥

इदं ब्रह्माण्डमखिलं क्रीडागेण्डूकमेव ते ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४॥

निक्षिप्तोत्क्षिप्तविक्षिप्तप्रतिक्षिप्ता वयन्तथा ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ५॥

विष्णो तव कृपा यस्य परमानन्दवर्षिणी ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ६॥

तपस्ते यस्य हृदयं भक्तिस्ते यस्य दर्शन ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ७॥

परमां निष्कलां सूक्ष्मां प्राप्य यश्चात्मनि स्थितः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ८॥

प्राणायामादिनिर्धूतकल्मषो यं समीक्षते ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ९॥

चन्द्रादित्यौ दृशौ यस्य ब्राह्मणा यस्य वै मुखम् ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १०॥

निक्षिप्तोत्क्षिप्तविक्षिप्तप्रतिक्षिप्ता वयं पुनः ।

नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ११॥

अग्निर्यस्य मुखं चास्य कर्णौ यस्य दिशोदश ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १२॥

वायुर्यस्य स्वयं श्वासो माया हास्यञ्च यस्य वै ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १३॥

पृथ्वी यस्यासनं सत्यं लोको मुकुटमेव यत् ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १४॥

दक्षिणा चोत्तरा दिक् च भुजौ यस्य महाबलौ ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १५॥

नासाग्रं यस्य पूर्वा दिक् पृष्ठं यस्य च पश्चिमा ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १६॥

यस्याज्ञाकारिणो वायुसूर्यचन्द्रधराम्बुदाः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १७॥

त्रैलोक्यं लङ्कितं येन दुर्लङ्घ्यशासनेन वै ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १८॥

यस्योदरस्थं सकलं त्रैलोक्यं भूर्भुवादिकम् ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ १९॥

मुखबाहूरुपादेभ्यो वर्णा यस्य बभूविरे ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २०॥

मनश्चक्षुःश्रुतित्वग्भ्यो यस्याभूवंस्तथाश्रमाः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २१॥

सहस्रशीर्षा यः कूटः सहस्राक्षः सहस्रपात् ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २२॥

आदित्यकोटिवर्णो यो योऽतीतो निखिलन्तमः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २३॥

एक उर्वरितो यस्तु कल्पान्ते महति प्रभुः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २४॥

एतावानेव नैव त्वमनन्तगुणशक्तिमान् ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २५॥

त्रिगुणानामपार्थक्यात्सृष्ट्यादि कुरुषे च यः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ २६॥

इति बृहद्धर्मपुराणान्तर्गता अदितिकृतः विष्णुस्तवः सम्पूर्णः ।

॥ बृहद्धर्मपुराणम् । मध्यखण्डः । अध्यायः ४६। ११-३६ ॥

Proofread by Ruma Dewan

*Vishnustava by Aditi*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*